# Shri Taravali

# શ્રીતારાવલિઃ

## Document Information

Text title : Shri Taravali

File name : tArAvaliH.itx

Category : raama

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 13, 2020

*sanskritdocuments.org*

# શ્રીતારાવલિઃ

શ્રીવત્સવત્સચિહ્નાઞ્ચિતવક્ષઃસ્થલ ધરાસુતાજાને ।
ત્વમિહ દયાદૃષ્ટ્યા મન્દાક્રાન્તં રક્ષ માં દયાશરધે(બ્ધિદાશરથે) ॥ ૧॥

કૃતયત્નવિફલકારિણમતિકષ્ટદમર્યમાત્મજં મન્દમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૨॥

શરણાગતરક્ષક તવ ચરણદ્વયભક્તિરસ્તુ મમ હૃદયે ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૩॥

અવમાનદમાપત્કરમરિપક્ષજયોત્સુકં સુદુઃખકરમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૪॥

નાનાપવાદભયદં સદનધનદ્રવ્યનાશકરકુદ્દાલમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૫॥

કુત્સિતગુણસમ્પન્નં ક્રૌર્યમનઃસંપ્રકાશિતોદ્યોગમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૬॥

ગૃધ્રાશનમતિમલિનં નિદ્રાલસ્યાદિદોષદં નૃણામ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૭॥

નિસ્તુલદારિદ્ર્યગુણાપ્રસ્તુતકાર્યપ્રસક્તિદં નિત્યમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૮॥

પુત્રકલત્રભ્રાત્રાખિલબન્ધુવિરોધજનકમતિકઠિનમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૯॥

નીલાઞ્જનનિભદેહં ડોલાયિતમાનસં બિડાલાક્ષમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૧૦॥

કુનખયુતં કૂર્મપદં કૃશગાત્રં શઙ્કુરૂપિણં ચ સદા ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૧૧॥

વિનિમીલિતસન્મીલિતલોચનયુતભુજગતોત્તમાઙ્ગનતમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૧૨॥

ગતલજ્જાહૃદયં નિર્ભાગ્યં બૃહદુદરપોષણતિલાદમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૧૩॥

આશાપિશાચભોગોલ્લાસકરં દૌર્મનસ્યદમશુભદમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૧૪॥

આનૃતનિષ્કૃતિવૈકૃતિકલિતમદોદ્રેકકારણં ચાહમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૧૫॥

નરપતિચોરહુતાશનભયદાનસમર્થમહિતકાર્યકરમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૧૬॥

કુટિલગતિં કઠિનમતિં સ્ફુટતરકટિઘટિતબાહુબલચેષ્ટમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૧૭॥

ચશ્ચલચિત્તસમુચ્છ્રિતમુઞ્છકવૃત્તિં શનૈઃ શનૈર્યાનમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૧૮॥

સકલજનનિન્દ્યમબલં વિકલાઙ્ગં કાલિમાભમપરેશમ્ ।
ન સ્તૌમિ તમસુરારે પરિપાલય માં દયાબ્ધિદાશરથે ॥ ૧૯॥

વિગતશ્રીકો વિલોમભાવો વીરુચિમુખ્યો (? ) વિવિધામયદઃ ।
કિમસૌ શનિરિહ કિં કુરુતે માં ત્વં પરિપાલય દાશરથે ॥ ૨૦॥

જનપદદેશવિદેશારણ્યાન્તરપર્યટનદ્રુતિબલદઃ ।
કિમસૌ શનિરિહ કિં કુરુતે માં ત્વં પરિપાલય દાશરથે ॥ ૨૧॥

કામક્રોધાદ્યરિભૂરિભયાકરસઞ્ચારોઽસ્ફુટ દેહઃ ।
કિમસૌ શનિરિહ કિં કુરુતે માં ત્વં પરિપાલય દાશરથે ॥ ૨૨॥

દુર્જનવચનશ્રવણપ્રચુરપ્રત્યયદઃ સત્સઙ્ગઘ્નઃ ।
કિમસૌ શનિરિહ કિં કુરુતે માં ત્વં પરિપાલય દશરથે ॥ ૨૩॥

આત્માનાત્મવિચારાભ્યન્તરદોઽવરદઃ પરિભૂતમનાઃ ।
કિમસૌ શનિરિહ કિં કુરુતે માં ત્વં પરિપાલય દાશરથે ॥ ૨૪॥

માયામયજગદખિલભ્રાન્તિકરો દેહાત્મજ્ઞાનહતઃ ।
કિમસૌ શનિરિહ કિં કુરુતે માં ત્વં પરિપાલય દાશરથે ॥ ૨૫॥

તાપત્રયભયદોષનિવારક ભદ્રગુણૌઘ દયાશરધે ।
કિમસૌ શનિરિહ કિં કુરતે માં ત્વં પરિપાલય દાશરથે ॥ ૨૬॥

રત્નકિરીટધરાચ્યુત રામાનન્ત મુકુન્દ દયાશરધે ।
કિમસૌ શનિરિહ કિં કુરુતે માં ત્વં પરિપાલય દાશરથે ॥ ૨૭॥

ઘનતરમુક્તાફલહારમિવાદરણીયેયં દાશરથે ।
તારાવલિરનિશં સકલાનાં સૌખ્યં નિતરાં વિતનોતુ ॥ ૨૮॥

શ્રીતડકમલ્લવંશોદ્ભવમનિશં કૃષ્ણરાયનામધરમ્ ।
ધરણીસુરવરવન્દ્યં પરિપાલય તં પ્રભું દાશરથે ॥ ૨૯॥

ઇતિ શ્રીતારાવલિઃ સમ્પૂર્ણા ।

Proofread by Aruna Narayanan

*Shri Taravali*

pdf was typeset on September 13, 2020

Please send corrections to *sanskrit@cheerful.com*